# कर्मयोगः (karma-yogaḥ)

ॐ श्रीपरमात्मने नमः। अथ तृतीयोऽध्यायः। कर्मयोगः।
om śrīparamātmane namaḥ. atha tṛtīyo'dhyāyaḥ. karmayogaḥ.

| | | |
|---|---|---|
| 1. | अर्जुन उवाच।<br>ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।<br>तत् किं कर्मणि घोरे माम् नियोजयसि केशव॥ | arjuna uvāca<br>jyāyasī cetkarmaṇaste<br>matā buddhirjanārdana<br>tat kiṁ karmaṇi ghore mām<br>niyojayasi keśava |
| 2. | व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।<br>तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥ | vyāmiśreṇeva vākyena<br>buddhiṁ mohayasīva me<br>tadekaṁ vada niścitya<br>yena śreyo'hamāpnuyām |
| 3. | श्रीभगवानुवाच।<br>लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।<br>ज्ञानयोगेन साङ्ख्यानाम् कर्मयोगेन योगिनाम्॥ | śrībhagavānuvāca<br>loke'smindvividhā niṣṭhā<br>purā proktā mayānagha<br>jñānayogena sāṅkhyānām<br>karmayogena yoginām |
| 4. | न कर्मणामनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते।<br>न च सन्न्यसनादेव सिद्धिं समधिगच्छति॥ | na karmaṇāmanārambhāt<br>naiṣkarmyaṁ puruṣo'śnute<br>na ca sannyasanādeva<br>siddhiṁ samadhigacchati |
| 5. | न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।<br>कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥ | na hi kaścitkṣaṇamapi<br>jātu tiṣṭhatyakarmakṛt<br>kāryate hyavaśaḥ karma<br>sarvaḥ prakṛtijairguṇaiḥ |
| 6. | कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।<br>इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते॥ | karmendriyāṇi saṁyamya<br>ya āste manasā smaran<br>indriyārthānvimūḍhātmā<br>mithyācāraḥ sa ucyate |
| 7. | यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।<br>कर्मेन्द्रियैः कर्मयोगम् असक्तः स विशिष्यते॥ | yastvindriyāṇi manasā<br>niyamyārabhate'rjuna<br>karmendriyaiḥ karmayogam<br>asaktaḥ sa viśiṣyate |
| 8. | नियतं कुरु कर्म त्वम् कर्म ज्यायो ह्यकर्मणः।<br>शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥ | niyataṁ kuru karma tvam<br>karma jyāyo hyakarmaṇaḥ<br>śarīrayātrāpi ca te<br>na prasiddhyedakarmaṇaḥ |

| | | |
|---|---|---|
| 9. | यज्ञार्थात्कर्मणोऽन्यत्र   लोकोऽयं कर्मबन्धनः।<br>तदर्थं कर्म कौन्तेय   मुक्तसङ्गः समाचर॥ | yajñārthātkarmaṇo'nyatra<br>loko'yaṁ karmabandhanaḥ<br>tadarthaṁ karma kaunteya<br>muktasaṅgaḥ samācara |
| 10. | सहयज्ञाः प्रजाः सृष्ट्वा   पुरोवाच प्रजापतिः।<br>अनेन प्रसविष्यध्वम्   एष वोऽस्त्विष्टकामधुक्॥ | sahayajñāḥ prajāḥ sṛṣṭvā<br>purovāca prajāpatiḥ<br>anena prasaviṣyadhvam<br>eṣa vo'stviṣṭakāmadhuk |
| 11. | देवान्भावयतानेन   ते देवा भावयन्तु वः।<br>परस्परं भावयन्तः   श्रेयः परमवाप्स्यथ॥ | devānbhāvayatānena<br>te devā bhāvayantu vaḥ<br>parasparaṁ bhāvayantaḥ<br>śreyaḥ paramavāpsyatha |
| 12. | इष्टान्भोगान्हि वो देवाः   दास्यन्ते यज्ञभाविताः।<br>तैर्दत्तानप्रदायैभ्यः   यो भुङ्क्ते स्तेन एव सः॥ | iṣṭānbhogānhi vo devāḥ<br>dāsyante yajñabhāvitāḥ<br>tairdattānapradāyaibhyaḥ<br>yo bhuṅkte stena eva saḥ |
| 13. | यज्ञशिष्टाशिनः सन्तः   मुच्यन्ते सर्वकिल्बिषैः।<br>भुञ्जते ते त्वघं पापाः   ये पचन्त्यात्मकारणात्॥ | yajñaśiṣṭāśinaḥ santaḥ<br>mucyante sarvakilbiṣaiḥ<br>bhuñjate te tvaghaṁ pāpāḥ<br>ye pacantyātmakāraṇāt |
| 14. | अन्नाद्भवन्ति भूतानि   पर्जन्यादन्नसम्भवः।<br>यज्ञाद्भवति पर्जन्यः   यज्ञः कर्मसमुद्भवः॥ | annādbhavanti bhūtāni<br>parjanyādannasambhavaḥ<br>yajñādbhavati parjanyaḥ<br>yajñaḥ karmasamudbhavaḥ |
| 15. | कर्म ब्रह्मोद्भवं विद्धि   ब्रह्माक्षरसमुद्भवम्।<br>तस्मात्सर्वगतं ब्रह्म   नित्यं यज्ञे प्रतिष्ठितम्॥ | karma brahmodbhavaṁ viddhi<br>brahmākṣarasamudbhavam<br>tasmātsarvagataṁ brahma<br>nityaṁ yajñe pratiṣṭhitam |
| 16. | एवं प्रवर्तितं चक्रम्   नानुवर्तयतीह यः।<br>अघायुरिन्द्रियारामः   मोघं पार्थ स जीवति॥ | evaṁ pravartitaṁ cakram<br>nānuvartayatīha yaḥ<br>aghāyurindriyārāmaḥ<br>moghaṁ pārtha sa jīvati |
| 17. | यस्त्वात्मरतिरेव स्यात्   आत्मतृप्तश्च मानवः।<br>आत्मन्येव च सन्तुष्टः   तस्य कार्यं न विद्यते॥ | yastvātmaratireva syāt<br>ātmatṛptaśca mānavaḥ<br>ātmanyeva ca santuṣṭaḥ<br>tasya kāryaṁ na vidyate |

| | | |
|---|---|---|
| 18. | नैव तस्य कृतेनार्थः नाकृतेनेह कश्चन।<br>न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥ | naiva tasya kṛtenārthaḥ<br>nākṛteneha kaścana<br>na cāsya sarvabhūteṣu<br>kaścidarthavyapāśrayaḥ |
| 19. | तस्मादसक्तः सततम् कार्यं कर्म समाचर।<br>असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः॥ | tasmādasaktaḥ satatam<br>kāryaṁ karma samācara<br>asakto hyācarankarma<br>paramāpnoti pūruṣaḥ |
| 20. | कर्मणैव हि संसिद्धिम् आस्थिता जनकादयः।<br>लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि॥ | karmaṇaiva hi saṁsiddhim<br>āsthitā janakādayaḥ<br>lokasaṅgrahamevāpi<br>sampaśyankartumarhasi |
| 21. | यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।<br>स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ | yadyadācarati śreṣṭhaḥ<br>tattadevetaro janaḥ<br>sa yatpramāṇaṁ kurute<br>lokastadanuvartate |
| 22. | न मे पार्थास्ति कर्तव्यम् त्रिषु लोकेषु किञ्चन।<br>नानवाप्तमवाप्तव्यम् वर्त एव च कर्मणि॥ | na me pārthāsti kartavyam<br>triṣu lokeṣu kiñcana<br>nānavāptamavāptavyam<br>varta eva ca karmaṇi |
| 23. | यदि ह्यहं न वर्तेयम् जातु कर्मण्यतन्द्रितः।<br>मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ | yadi hyahaṁ na varteyam<br>jātu karmaṇyatandritaḥ<br>mama vartmānuvartante<br>manuṣyāḥ pārtha sarvaśaḥ |
| 24. | उत्सीदेयुरिमे लोकाः न कुर्यां कर्म चेदहम्।<br>सङ्करस्य च कर्ता स्याम् उपहन्यामिमाः प्रजाः॥ | utsīdeyurime lokāḥ<br>na kuryāṁ karma cedaham<br>saṅkarasya ca kartā syām<br>upahanyāmimāḥ prajāḥ |
| 25. | सक्ताः कर्मण्यविद्वांसः यथा कुर्वन्ति भारत।<br>कुर्याद्विद्वांस्तथासक्तः चिकीर्षुर्लोकसङ्ग्रहम्॥ | saktāḥ karmaṇyavidvāṁsaḥ<br>yathā kurvanti bhārata<br>kuryādvidvāṁstathāsaktaḥ<br>cikīrṣurlokasaṅgraham |
| 26. | न बुद्धि भेदं जनयेत् अज्ञानां कर्मसङ्गिनाम्।<br>जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्॥ | na buddhi bhedaṁ janayet<br>ajñānāṁ karmasaṅginām<br>joṣayetsarvakarmāṇi<br>vidvānyuktaḥ samācaran |

| | | |
|---|---|---|
| 27. | प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।<br>अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥ | prakṛteḥ kriyamāṇāni<br>guṇaiḥ karmāṇi sarvaśaḥ<br>ahaṅkāravimūḍhātmā<br>kartāhamiti manyate |
| 28. | तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।<br>गुणा गुणेषु वर्तन्ते इति मत्वा न सज्जते॥ | tattvavittu mahābāho<br>guṇakarmavibhāgayoḥ<br>guṇā guṇeṣu vartante<br>iti matvā na sajjate |
| 29. | प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु।<br>तानकृत्स्नविदो मन्दान् कृत्स्नविन्नविचालयेत्॥ | prakṛterguṇasammūḍhāḥ<br>sajjante guṇakarmasu<br>tānakṛtsnavido mandān<br>kṛtsnavinnavicālayet |
| 30. | मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा।<br>निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥ | mayi sarvāṇi karmāṇi<br>sannyasyādhyātmacetasā<br>nirāśīrnirmamo bhūtvā<br>yudhyasva vigatajvaraḥ |
| 31. | ये मे मतमिदं नित्यम् अनुतिष्ठन्ति मानवाः।<br>श्रद्धावन्तोऽनसूयन्तः मुच्यन्ते तेऽपि कर्मभिः॥ | ye me matamidaṁ nityam<br>anutiṣṭhanti mānavāḥ<br>śraddhāvanto'nasūyantaḥ<br>mucyante te'pi karmabhiḥ |
| 32. | ये त्वेतदभ्यसूयन्तः नानुतिष्ठन्ति मे मतम्।<br>सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः॥ | ye tvetadabhyasūyantaḥ<br>nānutiṣṭhanti me matam<br>sarvajñānavimūḍhāṁstān<br>viddhi naṣṭānacetasaḥ |
| 33. | सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।<br>प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति॥ | sadṛśaṁ ceṣṭate svasyāḥ<br>prakṛterjñānavānapi<br>prakṛtiṁ yānti bhūtāni<br>nigrahaḥ kiṁ kariṣyati |
| 34. | इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।<br>तयोर्नवशमागच्छेत् तौ ह्यस्य परिपन्थिनौ॥ | indriyasyendriyasyārthe<br>rāgadveṣau vyavasthitau<br>tayornavaśamāgacchet<br>tau hyasya paripanthinau |
| 35. | श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।<br>स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ | śreyānsvadharmo viguṇaḥ<br>paradharmātsvanuṣṭhitāt<br>svadharme nidhanaṁ śreyaḥ<br>paradharmo bhayāvahaḥ |

| | | |
|---|---|---|
| 36. | अर्जुन उवाच।<br>अथ केन प्रयुक्तोऽयम् पापं चरति पूरुषः।<br>अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥ | arjuna uvāca<br>atha kena prayukto'yam<br>pāpaṁ carati pūruṣaḥ<br>anicchannapi vārṣṇeya<br>balādiva niyojitaḥ |
| 37. | श्रीभगवानुवाच।<br>काम एष क्रोध एषः रजोगुणसमुद्भवः।<br>महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥ | śrībhagavānuvāca<br>kāma eṣa krodha eṣaḥ<br>rajoguṇasamudbhavaḥ<br>mahāśano mahāpāpmā<br>viddhyenamiha vairiṇam |
| 38. | धूमेनाव्रियते वह्निः यथादर्शो मलेन च।<br>यथोल्बेनावृतो गर्भः तथा तेनेदमावृतम्॥ | dhūmenāvriyate vahniḥ<br>yathādarśo malena ca<br>yatholbenāvṛto garbhaḥ<br>tathā tenedamāvṛtam |
| 39. | आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।<br>कामरूपेण कौन्तेय दुष्पूरेणानलेन च॥ | āvṛtaṁ jñānametena<br>jñānino nityavairiṇā<br>kāmarūpeṇa kaunteya<br>duṣpūreṇānalena ca |
| 40. | इन्द्रियाणि मनो बुद्धिः अस्याधिष्ठानमुच्यते।<br>एतैर्विमोहयत्येषः ज्ञानमावृत्य देहिनम्॥ | indriyāṇi mano buddhiḥ<br>asyādhiṣṭhānamucyate<br>etairvimohayatyeṣaḥ<br>jñānamāvṛtya dehinam |
| 41. | तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।<br>पाप्मानं प्रजहिह्येनम् ज्ञानविज्ञाननाशनम्॥ | tasmāttvamindriyāṇyādau<br>niyamya bharatarṣabha<br>pāpmānaṁ prajahihyenam<br>jñānavijñānanāśanam |
| 42. | इन्द्रियाणि पराण्याहुः इन्द्रियेभ्यः परं मनः।<br>मनसस्तु परा बुद्धिः यो बुद्धेः परतस्तु सः॥ | indriyāṇi parāṇyāhuḥ<br>indriyebhyaḥ paraṁ manaḥ<br>manasastu parā buddhiḥ<br>yo buddheḥ paratastu saḥ |
| 43. | एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।<br>जहि शत्रुं महाबाहो कामरूपं दुरासदम्॥ | evaṁ buddheḥ paraṁ buddhvā<br>saṁstabhyātmānamātmanā<br>jahi śatruṁ mahābāho<br>kāmarūpaṁ durāsadam |

ॐ तत् सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः॥
श्रीकृष्णार्पणमस्तु॥

om tat sat - iti śrīmadbhagavadgītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde karmayogo nāma tṛtīyo'dhyāyaḥ

śrīkṛṣṇārpaṇamastu